शविस्तार इत्यत्र कथितः अर्थात् साक्षाद्धरितो दशरथादी
नां पुत्रपौत्रप्रपंचः तथा च वक्तुः कथनसामर्थ्याद्भूतं भविष्यं च
वृत्तं सर्वं कथनसमयेऽस्य संभवतीति वाल्मीकिविरचि
तरामायणादावुक्तं एवं नारदादिष्वपि परंत्वयमनुभवो
भक्तानां सहृदयानां चैव ननु कथनेन का बाधा यक्षारिराणामि
स्नूणां दरिद्राणां किंच सन्त्कियन्देशकालौ च शौचं ब्राह्मण
संपदः पंचैतान्विस्तारो हन्ति तस्मान्नेह तु विस्तरमिति मनुव
चने कथनस्य वर्णनरूपार्थाभावेऽपि विस्तर इति प्रयोगो दृश्यते
एवं ब्रह्मणो मानसः पुत्रो गोपतिर्नाम मानवः तस्य वंश
स्य विस्तारं क्षमो वक्तुं नरः कथमिति भविष्यपुराणस्यश्लो
के कथनरूपार्थेऽपि विस्तार इति प्रयोगस्य दर्शनात् अथ
वा केवलात्स्तृधातोर्घञ्प्रत्यये कृते पश्चाद्विशब्दयोगे वि
स्तार इति प्रयोगो भवति स च समुदायवाचकतया विस्तृतरूपा
र्थस्य बोधकः ततो वंशशब्देन समासः अथ च वंशविस्ता
र इति साधु प्रयोगो जायते अथवा यथा महाभारते चक्र
वत्परिवर्तनं गृहीत्वा पाणिना करमिति श्लोके परिवर्तन
मित्यत्र पुंस्त्वं तद्भावश्चार्षः एवमत्रापि वंशविस्तार इ
त्यार्षप्रयोगः एवं च कथितो वंशविस्तारो भवतेत्यत्र पृष्ठे
वितिकस्य चिज्जन्मांधस्य कथनमेवाशुद्धमिति ॥ ९ ॥

निगमकल्पतरोर्गलितमित्यादि· अत्र वेदनित्या
कृताहिपतितमिति वाक्ययोग लितमित्यत्र युक्तम्

एकादशीद्वेपंचम्योवात्रासम्बद्धमेवशृणुतेति
वक्तृभ्येपिवतेत्यशुद्धमेव ॥

निगमकल्पतरोर्गलितं फलमितिश्लोके श्रीमद्भागवतस्य महापुराणस्य वेदकल्पवृक्षस्य फलरूपत्ववर्णनेनास्य वेदरूपत्वं प्रतिपादितं वेदशब्दः ऋगादीनामिव पुराणादीनामपि वाचकः तदुक्तं सामसु कौथुमीशाखायां छांदोग्योपनिषदि ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासपुराणं पंचमं वेदानां वेदमित्यादि मनुः इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति नह्यवेदेन वेदस्य बृंहणं भवति नह्यपरिपूर्णस्य कनकवलयस्य त्रपुणा पूरणं युज्यते पूरणात्पुराणमिति चान्यत्र भविष्यपुराणे ऋग्यजुःसामाथर्वाख्यः काव्यं रामायणं तथा । भारतं पंचरात्रं च वेदा इत्येव शब्दिताः पुराणानि च सर्वाणि वैष्णवानि विदो विदुः स्वतःप्रामाण्यमेतेषां नात्र किंचिद्विचार्यत इति पुराणादीनामपि ऋग्वेदादिवदपौरुषेयत्वं । माध्यंदिनश्रुतावुक्तम् एवं वाऽरेस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणमित्यादि अपरार्के मत्स्यपुराणे मत्स्य उवाच पुराणं धर्मशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् अनंतरं च वक्त्रेभ्यो वेदा अस्य विनिर्गताः पुराणमेकमेवासीत्तस्मिन्कालांतरेपि च त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरं

नदर्योत्रचतुर्लक्षेसंक्षेपेणप्रदर्शितः पुराणानिदशाष्टौच
सांप्रतंतदिहोच्यते नामतस्तान्प्रवक्ष्यामिशृणुध्वमृषि
सत्तमा इत्यादि शिवपुराणस्यवायवीयसंहितायाम्
संक्षिप्यचतुरोवेदांश्चतुर्धाव्यभजत्प्रभुः व्यस्तवेदतया
लोकेवेदव्यासइतिश्रुतः पुराणमपिसंक्षिप्तंचतुर्लक्ष तेनेतिशेषः
प्रमाणतः अद्याप्यमर्त्यलोकेतच्छतकोटिप्रविस्तरमि
ति एवंचात्रवेदनिन्दाकृताहीतिकस्यचिद्विक्षिप्तस्यक
थनमेव अत्रगलितमितिपदं शिष्यप्रशिष्यादिरूप
पल्लवपरंपरयाशनैरखंडमेवावतीर्णनत्त्वनिपा
तेनस्फुटितमित्यर्थकम् अत्रशद्बश्लेषेणचभागव
तंरसंनामभगवत्संबंधिरसमितिज्ञेयम् तत्पक्षेगलित
मित्यनेनतस्यसुपाकिमत्वेनाधिकस्वादुत्वंदर्शितम्
शास्त्रपक्षेसुनिष्पन्नार्थत्वेनाधिकस्वादुत्वमितिज्ञे
यम् एवंचपतितमितिवक्तव्येगलितमित्यशुद्धमिति
कस्यचित्प्रमत्तस्यकथनमेवाशुद्धम् निगमकल्पतरु
पदोत्तरवर्तिनीयाषष्ठीतस्याःफले ऽन्वयः शुकमु
खादितिपंचम्याःगलितमित्यत्रान्वयः एवंचएकाष
ष्ठीद्वेपंचम्यौवात्रासम्बद्धमेवेतिकस्यचित्कथनमेवा
संबद्धम् शास्त्रपक्षेयतःश्रीमद्भागवतंरसात्मकफ
लस्वरूपमतःपिबत एवंलोकेसज्जनषट्पदैरहरहः
पपीयमानंमुदाभूयाद्भारतपंकजमित्यत्रयदीयानां

वाचामसत्तमवसानामभिरसमित्यादावपि ज्ञेयम् भगव
त्संबंधिरसपक्षे तु रसस्य पानमेव संभवत्यत आह पिबत
इति इत्यंच भरत ज्ञाने निबन्ध्ये पिबतेत्यशुद्धमेवेति क
स्यचित्कथनमेवाशुद्धम्

नेमं विरिञ्चिर्न भवो न श्रीरप्यंगसंश्रया प्र
सादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥१॥
अत्रैकोनकारः सार्थको द्वावनर्थकौ स्तो निं
दाचक्रुताद्ब्रह्मादीनां देवक्यादीनाञ्च ॥०॥

अत्र इमं पूर्वोक्तं प्रेमपरीपाकरूपं प्रसादं न विरिञ्चः
प्राप न भवः प्राप न श्रीरपि प्रापेत्यर्थः अथवा गोपी
यत्तत्प्राप तद्रूपमिमं विरिञ्चादयो न लेभिरे न लेभिरे
न लेभिरे न अत्र यवशेन क्रियावृत्तिः अथवा नेमन्नशब्दो
ऽर्द्धवाचकः तदुक्तं सिद्धान्तकौमुद्यां नेमइत्यर्द्धे समः स
र्वपर्य्याय इति तथा च विरिंच्यादयो नेमम् अर्द्धमपूर्णं प्र
सादं न लेभिरे न अपि तु लेभिर एव गोपी त्वित्सादिव्या
ख्येयम् अत्रैकोनकारः सार्थको द्वावनर्थकौ स्त इत्यु
क्तकथनमेवानर्थकम् अथवा यशोदायाः शुद्धवात्स
ल्यभावेन परमोत्कर्षवर्णनम् न तु देवक्या ऐश्वर्य्यसंव
लितभावेन न शुद्धवात्सल्यभावः ब्रह्मादीनां नरा
कारपरब्रह्मणि न वात्सल्यभावः इत्यमेव प्रेम्णोऽथ
परमा काष्ठा प्रारा परित्यागावधिविरहासहिष्णुता

रूपेत्यादि मधुसूदनसरस्वतीभिरुक्तम् आदिपुराणे च तेनेब्रह्मादयो देवा वांछन्ति मदनुग्रहम् प्रयत्नेना सां गोपीनां प्रेमानुग्रहवांछकः भावानुरूपं सर्वत्र पा र्थव्यवहराम्यहम् किंतु नासु ब्रजस्त्रीषु परिकीनः वां निरुपामिति एवंच निंदाचकृतेत्यादिकं कस्यचि । न्निन्दकस्य कथनमेवेति

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविं द विमुखाच्छ्वपचं वरिष्ठम् अत्र ब्राह्मणा निंदा कृता अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः अस्माद्विरुद्धत्वादशुद्धोऽपि ।

अत्र भगवद्भक्तानां माहात्म्यवर्णने भक्तिहीनानां निन्दने च नाश्चर्यम् नब्राह्मणानिन्दने एवं पद्मपुराणे ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि वेतरः विष्णुभ क्तिसमायुक्तो ज्ञेयः सर्वोत्तमोत्तमः चांडालोपि म । निश्रेष्ठो विष्णुभक्तिपरो यदि विष्णुभक्ति विहीनस्तु द्विजोपि श्वपचाधमः इति क्रियायोगसारे जैमिनिं प्रति व्यासवाक्यम् यस्मिन्कुले द्विजश्रेष्ठ जायंते वै ष्णवाजनाः उत्तमं वानुत्तमं वा तत्कुलं मोक्षगामि चे ति शंकराचार्यधृत कात्यायनवचनेच वरं हुतवह ज्वालापंजरस्यांतर्व्यवस्थितिः न शौरिचिंताविमुख जनसंवासवैशसमिति नारदीये रुक्मांगदं प्रति ब्राम

देववाक्यम् श्वपचोपिमहीपालविष्णुभक्तोद्विजाधिकः
विष्णुभक्तिविहीनोपियतिश्चश्वपचाधिकइति एवंचा
त्रब्राह्मणानिंदाकृतेनिकस्यचिन्निंदकस्यकथनमेवे
तिकृष्णरूपेणप्रादुर्भूतंमांपामराअव्यक्तंमन्यंतइत्य
र्थः अनंतफलायाहोखल्वकष्टंवर्त्ततइत्यनुक्रोशान्द
र्शयतिभगवान् किंनिमित्तंत्वामेवनप्रपद्यंतइत्युच्यते
अव्यक्तमिति अव्यक्तं अप्रकाशंव्यक्तिमापन्नंप्रकाशं
गतमिदानींमन्यंते मांनित्यप्रसिद्धमीश्वरमपिसंतमबु
द्धयोऽविवेकिनइतिशंकरभाष्यम् उक्तेवैपरीत्येकारणा
मविवेकातिरिक्तंनास्तीत्यभिप्रेत्याह अहोखल्विति ।
भगवद्भजनस्योत्तमफलत्वेपिप्राणिनांप्रायेणतन्निष्ठ
त्वाभावेप्रश्नपूर्वकंनिमित्तंनिवेदयति किंनिमित्तमि
त्यादिना अप्रकाशंशरीरग्रहणात्पूर्वमितिशेषः इदा
नींलीलाविग्रहावस्थायामित्यर्थः प्रकाशस्यनर्हिका
दाचित्कत्वंभगवतिप्राप्तंनेत्याह नित्येति कथंतर्हीत्या
दितट्टीका एवंचअस्माद्विरुद्धत्वादशुद्धोपीतिकस्यचि
त्पामरस्यकथनमेवाशुद्धमिति ॥ ॥ ॥

कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविना
पशुघ्नात् अत्रवेदविहितकर्मकर्त्तॄणांनिन्दाकृताअ
र्थाद्वेदानामपि नास्तिकोवेदनिन्दकइत्युक्तंमनु
ना अतएवायंभागवतस्यास्यकर्त्तानास्तिकः

ऽअत्रभगवत्कथामाहात्म्यवर्णनंतद्विमुखानांचनिन्दनं
कृतम् वायुपुराणेस्कन्दपुराणादौचैतद्विस्तरेणकथितं
तत्रैवावलोकनीयम् योगोश्रातंकनकशृंगमयंददाती
त्यादौ चरितंरघुनाथस्येत्यादावपितथैवोक्तम् ऽअत्रवेद
विहितेत्यादिकथनंतुकस्यचिद्दुष्टस्यैव यतोवेदव्यास
स्यवेदरूपस्यास्यश्रीमद्भागवतस्यचायंनिन्दकोऽतो।
मनुवचनान्नूनमयंनास्तिकएवेति ॥ ॥ ॥

यद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लो
कमबद्धवत्यपि॰ ऽअसम्बद्धोयंश्लोकः ॥

ऽअत्रापशब्दादियुक्तेपिवाचांप्रयोगेयस्मिन्भगवतोना
मानिसंति सकलमघघ्नः चित्रपदादियुक्तेपियत्रभगव
तोनामानिनसंतिसतुनपापघ्नः लौकिकभाषायामपि
भगवतोनामकीर्त्तनादिकं पापनिवर्त्तकमितितदुक्तं।
मात्स्येदंष्ट्रिदंष्ट्राहतोम्लेछोहारामेतिपुनःपुनः उक्त्वा
मुक्तिमवाप्नोतिकिंपुनःश्रद्धयागृणन्निति इत्थंचास
म्बद्धोयंश्लोकइतिकस्यचिद्दुर्जनस्यकथनमेवासम्ब
द्धमिति

व्यासनारदसंवादेव्यासस्यापिनिंदाकृताव्यासः
शोकातुरोऽभूत्तत्रनारदऽआगतः पुनर्नारदेन
वोधितइतिव्यासस्तुनारायणावतारस्त
स्यकथंशोकःसंभवेत्

ऽअत्रप्राधान्यतोभगवद्यशोऽवर्णनेनव्यासस्यशोकानु
रत्वंकात्वन्येषांवार्त्ता नारदेनभगवद्भक्तिवर्णने प्रेरितो
व्यासस्तद्वर्णनेनविशोकः सन्परमानन्दंप्राप्तवान्
ऽअतोभगवद्भक्तिः शोकनाशिनी ब्रह्मज्ञानादपिप
रमानंददायिनीतिनाश्चर्य्यम् किंच यथामहाभार
तेपुत्रवियोगेनव्यासस्य शोकानुरत्ववर्णनम् यथावा
वाल्मीकिविरचितरामायणेरघुनाथस्यसीताविरह
जदुःखेनशोकानुरत्वकथनंमनुष्यदेहधारणेन न
टवद्व्यहारनटनाभिप्रायेणतदत्रापिज्ञेयम् यथावा
वाल्मीकिविरचितरघुनाथचरित्रेयुद्धकाण्डेयुद्धपरि
श्रांतंचिंतयास्थितंरामंप्रत्यगस्त्योपदेशोलोकानुग्र
हाय एवमत्रनारदोपदेशोपिलोकशिक्षणार्थैवेतिज्ञे
यम् एवंचात्रव्यासनिंदाकृतेतिकस्यचिन्निन्दकस्य
जन्मांधस्यशठस्यैवकथनमिति ॥ ० ॥ ० ॥ ० ॥

भस्मासुरकथायांशिवस्यापिनिंदाकृताभस्मासु
रभयाच्छिवः कैलासंविहायवनंगतवान्पुन
र्विष्णुनारक्षितइतिकस्मादपित्रैलोक्येभयंन
संभवतिशिवस्ययदिकश्चिद्ब्रूयान्दत्तवराय
भस्मासुरायदण्डंनदत्तवानितितर्हिरावणा
यदत्तवरायशिवेनदण्डः कथंदत्तः यस्यक्रो
धलेशेनसर्वंपंचभूतात्मकंजगद्भस्मीभूतं

भवति तस्य भयं कर्त्तुं कः समर्थः पुमान् भवेत्
अत्र सत्त्वतनोर्विष्णोरुपासनया जीवानां श्रेयांसि नेतरे
षां देवानामुपासनयेति विष्णोरुत्कर्षवर्णने चेतितात्प
र्य्यम् तदुक्तमादिपुराणे तज्जानाति नरो मूढः किं देवैः
सेवितैः सुखम् श्वलांगूलं समाश्रित्य को हि तीर्णोऽम्बु
धेर्ज्जलम् येऽधमाः पापकर्माणो देवतांतरसेवकाः
कामिनो विष्णुविमुखास्ते यांति नरके ध्रुवम् पतिं त्य
क्त्वा यथा नार्य्यो जारं सुखलवेक्षया भजन्ति लोके निं
दान्ताः प्राप्नुयांत्यधमां गतिं देवाश्च कर्मसचिवाः के
वलं न हितेरताः अपराधे कृतेऽल्पे वै देहद्रविणनाश
काः यैर्यैः संसेविता देवा नैव तेषां सुखं ध्रुवम् सदैव सू
र्य्यं संसेव्य पंगुरेवारुणोऽभवत् शिवसेवां समासाद्य क्षयं
प्राप वृकासुरः बाणो बाहुसहस्रस्य नाशं कृष्णादवा
पह विश्वरूपः सुरपतिं संतोष्य निधनं गतः आराधन
विरोधाभ्यां देवैर्नाशो हि दृश्यते विपरीतमिदं विष्णोरु
भाभ्यां मुक्तिभाग् भवेदिति एवं भगवदुपासनयैव निः
श्रेयसाधिगमो जीवानां न देवतांतरोपासनयेति हरिवं
शे काशीखंडे च घंटाकर्णकथाप्रसंगे स्पष्टमेवोक्तं वि
स्तरेण तत्रैवावलोकनीयमिति महाभारते व्यासवा
क्यम् आलोड्य सर्वशास्त्राणि विचार्य्य च पुनःपुनः
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदेति हरिवंशेम

हादेववाक्यं हरिरेकः सदा ध्येयो भवद्भिः सत्वसंस्थितैरि
ति पाद्मे यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः समत्वेनै
ववीक्षेत स पाषण्डी भवेद्ध्रुवमिति स्कांदे शिवशास्त्रे
युतद्ग्राह्यं भगवच्छास्त्रयोगि यदिति आदिवाराहे ।
जन्मांतरसहस्रेण समाराध्य वृषध्वजम् वैष्णवत्वं
लभेद्धीमान् सर्वपापक्षये सतीति सत्वैकस्वभाव
स्येश्वरस्य नंदनंदन विग्रहेऽतिशयेन सत्त्वमभिव्य
क्तं अतएव तस्मिन्निरतिशयं धर्मज्ञानवैराग्यैश्वर्या
दिकमस्ति कामक्रोधाऽभिमानि देवता विग्रहे तु स
त्वं तिरोभूतम् औपाधिकं लोभप्रवृत्त्यादिकं प्रमाद
मोहादिकं चाविर्भूतमिति महाभारतटीकायामिति न
सिंहतापिन्यां रुद्रजापकशतमेकमथर्वांगिरसशिखाध्याप
केन तत्समं अथर्वांगिरसशिखाध्यापकशतमेकं मंत्र
राजाध्यापकेन तत्सममित्याद्यनेकवचनानां च विष्णोरु
त्कर्षवर्णनेनास्पर्ध्यम् न तु शिवनिंदने निंदनं तु सर्वथा
परिहर्त्तव्यमेव तदुक्तं भगवता यो मां समर्चयेन्नित्यमे
२ कांतं भावमास्थितः विनिंदन्देवमीशानं स याति नरकं ।
ध्रुवमिति भस्मासुरभयाच्छिवस्य पलायनं तु विष्वक्सेनो
पि संवर्द्ध्य स्वयं छेत्तुमसांप्रतमिति न्यायेन एवं श्रीभगव
तः कृष्णस्य कालयवनात्पलायनादावपि बोध्यम् कै
लासोत्पाटने दत्तवराय रावणाय शिवेन योद्रोऽडादत्तः

सनुरावणस्य हितायैवेति ततः प्रीतो महादेवः शैलाग्रे वि
स्थितं प्रभुः मुक्त्वा चास्य भुजान्रामः प्राह वाक्यं दशानन
म् प्रीतोस्मि तव वीरस्येत्यादि वाल्मीकिरचितरामचरित्र
स्योत्तरकाण्डस्य स्पष्टमुक्तम् अथ च भस्मासुरभयात्पला
यनं रावणस्य दण्डदानमिति स्वतंत्रेच्छस्य नियोगपर्य्यनु
योगानर्हस्य महादेवस्य इच्छैव नियामिकेति बोध्यम्
इत्थं च भस्मासुरकथायामित्यादिकथनं कस्यचिन्म
हामूर्खस्यैवेति ज्ञेयम् ॥

बाणासुरकथायामपि शंकरस्य निंदाकृता
कृष्णेन शंकरः पराजित इति कोपि शंकरं
पराजेतुं समर्थो नास्ति

अत्र श्रीकृष्णात् शंकरपराजयवर्णनं एवं वाल्मीकिरा
मायणस्य बालकाण्डे तदा तु देवताः सर्वाः पृच्छन्ति स्म
पितामहं शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया
अभिप्रायं तु विज्ञाय सदेवानां पितामहः विरोधं जनया
मास तयोः सत्यवतां वर विरोधे तु महायुद्धमभवद्रोमहर्ष
णम् शितिकण्ठस्य विष्णोश्च परस्परजयैषिणोः तदा तु
जृम्भितं शैवं धनुर्भीमपराक्रमम् हुंकारेण महादेवस्तं
भितोऽथ त्रिलोचनः देवैस्तदा समागम्य सर्षिसंघैः स
चारणैः याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ जृम्भितं
तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः अधिकं मेनिरे विष्णुं

देवाः सर्षिगणास्तथेत्यादिभिः समरेखांकराद्धिह्मोराधिक्यवर्णानमस्त्येवेति एवंमहाभारतस्य शांतिपर्वणापदि इत्यंचवाणासुरकथायामित्यादिकथनंत्वज्ञानमूलकमेवेति

गृहस्थानामपिनिंदाकृताकपोतगुरुकरणकथायांगृहस्थाश्रमोऽश्रेष्ठ इति यथानदीनदाः सर्वेसागरेयांतिसंस्थितिम् तथैवाश्रमिणः सर्वेगृहस्थेयांतिसंस्थितिम् श्रेष्ठ एवगृहस्थाश्रमोव्यवहारेऽतोऽश्रेष्ठ इतिकथनंयत्नस्त्रमत्तगीतमेव ॥

ऽश्राश्रमांतरसाध्यंज्ञानंगृहस्थेनसाधयितुंशक्यंननुगृहस्थेनसाध्यंयज्ञादिकं ऽश्राश्रमांतरेप्यस्तीतिकृत्स्नोधर्मोगार्हस्थ्यएवप्राप्यते संन्यासिनांगृहस्थगृहेविहितंभोजनादिकं गृहस्थः स्वात्मानमन्यांश्चपित्रादीन्तारयति यतींश्चपुष्णाति यतिस्त्वात्मानमेवतारयतिनपित्रादीन् पोषणंचस्वस्यापिनकरोतिभिक्षोपजीवित्वादतोगार्हस्थ्यमेवश्रेष्ठमितिमहाभारतादावुक्तम् सर्वाश्रमानुपादायस्वाश्रमेणकलत्रवान् व्यसनार्णवमत्येतिजलयानैर्यथार्णवमित्यादिवाक्यैः श्रीमद्भागवतेच परंचतत्रगृहासक्तिर्नकार्य्याकपोतगुरुकरणकथायाः गृहासक्तिस्त्रिश्रामप्यनर्थहेतुर्मनुष्यस्यत्वतिनिंदितेतितात्पर्य्यमिति इत्यंचगृहस्थानामपिनिंदाकृतेत्यादिकं कस्यचिद्भिक्षुकपरास्यवान्ताशिनः कथनमसंबद्धम् ॥ ०॥

कृष्णस्यापि निंदा कृता रासमण्डलचीरलीलाकथायाम् परस्त्रीभिर्लीलां कृतवान् कृष्णः नग्नदाराहृस्यवांश्चेति अदत्तानामुपादानं हिंसा चैवाविधानतः परदारोपसेवा च शारीरं त्रिविधं स्मृतं पापमिति शेषः नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियमित्याह भगवान्मनुः अस्माद्विरोधाल्लोकविरोधाच्च प्रमत्तगीतमेतत् ।

रासलीलावर्णनम् ब्रह्मवैवर्त्ते गर्गसंहितायां पद्मपुराणे आदिपुराणे विष्णुपुराणे हरिवंशे आदिवाराहे बृहद्गौतमीयतंत्रे गौरीतंत्रे अग्निपुराणे विष्णुतंत्रे गोपालतापिन्यां ब्रह्मसंहितायां कृष्णयामले विष्णुयामले तथान्येष्वार्षग्रंथेष्वस्ति तथा मधुसूदनसरस्वतीकृतभगवद्भक्तिरसायने आचार्यकृतप्रबोधसुधाकरे माधवपुरी विष्णुपुरी प्रभृतिग्रंथेषु तथा गीतगोविंदप्रभृतिकाव्येषु मुरारिनाटकादिषु तथा धर्मशास्त्रनिबंधेषु क्रमदीपिकादिमंत्रशास्त्रग्रंथेष्वस्त्येव किंच शंकराचार्यैः गोपीमण्डलगोष्ठीभेदमिति गोविंदाष्टके गोपीनां मंडलं समूहस्तेन सह गोष्ठीभेदः क्रीडाविशेषो यस्य स तथोक्तस्तं रासक्रीडारतमित्यर्थ इति टीकाकारेण च रासलीलावर्णिना एवं तत्रैव स्नानव्याकुलयोषिद्वस्त्रमुपादायागमत्पारूढं व्यादिस्संतीरय दिग्वस्त्राऽपाद्य

तुमुपकर्षतमिति स्नानार्थंजलक्रीडार्थंव्याकुलाः संभ्रांता योषितस्तासां वस्त्रमुपादाय स्वीकृत्य अगंवृक्षं अगवृक्षवत्लीलाकदंबवृक्षमधिरूढमुच्यत इत्यागमवचनात् कीदृग्विधमित्याह दिग्वस्त्रा इति दिगंवराः अत एव वस्त्रंव्यादित्सन्तीः विशेषेणादातुमिच्छन्तीः तायोषितः उपसमीपे आकर्षतं स्वनिकटमानयंतमित्यनेन चीरलीलानैः प्रतिपादितैवेति स्मृतिकारोक्तपरदारोपसेवनादिकं मनुष्याणां पापावहं न तु देवानां तदुक्तं महाभारततात्पर्यविनिर्णये ननु वेदविरुद्धमेकस्या बहुभर्तृता नैकस्यै बहवो नैकाद्वौ पती इति च श्रुतौ नैकस्यै बहवस्सह पतय इति तस्मान्नैकाद्वौ पती विंदते इति च विशेषः अग्नीन्यंचक्रमात्साप्य हव्यमेति मनुष्यतां अग्नयस्त्वग्निरर्कः क्ष्मा पुरुषोयोषिदित्यपि अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः द्रोणो वह्निश्चतुष्कोस्या योषिदग्नेरभावतः अग्निर्द्वयोस्थितासीत्साभूत्या पित्रोरभावतः अग्निर्द्वयोस्थिता देवानस्पृशंतिक्षितिं हि ते देवजाः पार्थमाद्रेयाभूद्युमरापग्निवर्जिताः एकाग्निजातौ च सुतौ द्रुपदस्य सुराधिकौ सर्वे सर्वात्मका देवा विराजो वयवायतः सर्वएव समाः सर्वे नंतात इति हि वेदगीः नतेषां व्यभिचारोस्ति न चै

त्सूर्ययमौकथं पितापुत्रोसतीं कुंतीमुपेयातां सुरेन्द्रमो
द्रौपदीं देवजां पार्था देवजा यदि भुंजते न तेषामत्र दोषो
स्ति देवा एव हि ते स्वयम् अयतेन हि वै देवान्पापं गच्छति
सर्वथा तस्माद्यज्ञैर्देवभावं प्रार्थयीत निरेनसं एतद्देवा
हि के व्यासो नानाख्यानोपबृंहणैः दर्शयामास लोका
नां संशयस्यापनुत्तय इति एवमात्मज्ञानिनः पापं कर्म
न लगति तदुक्तं वेदे तद्यथा पुष्कर पलाश आपो न श्लि
ष्यंते एवमेवैवं विदि पापं कर्म न श्लिष्यते न कर्मणा लि
प्यते पापकेन न तत्सुकृतदुष्कृते विधुनुते एतं ह वाव न तप
ति किमहं साधुनाऽकरवं किमहं पापमकरवमिति ए
वं मद्भक्तो वा नपेक्षक इत्यादि कथनाद्भगवद्भक्तोपि वि
धिनिषेधातीत इति इत्थं च यदि देवादीनामपि व्यभि
चारादिकं कर्म न दोषावहं किमुत पुनः श्रीकृष्णस्य प
रब्रह्मणः सकल देवानामादिकारणस्य व्यभिचारशं
केति ज्ञेयम् एवं शंकरस्य वृषभपृष्ठ आरोहणम् प्रे
तैः सह संवासः शवशयने क्रीडनम् शवदाहभस्म
नोंगे धारणम् मनुष्यकपालमालापरिधानम् खट्
वांगधारणमित्यादि यत्स्कंदपुराणादिषु वर्णितं वा
लातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनम् सविनाशं व्रज
त्याशु सत्त्वकोऽशुचिरेव चेत्यादि मनुवचनविरोधात्त
स्यापि न व प्रमत्तस्य महामूर्खस्य मतेप्रमत्तगीतेस्या

इतिकिंबहुना
आप्तकामोयदुपतिःकृतवान्जुगुप्सितमकि
मभिप्रायएतन्नःसंशयंछिंधिसुव्रत अत्रापि
कृष्णस्यनिंदाकृतासर्वज्ञःकृष्णःकदाचिज्जु
गुप्सितंकर्मनकुर्य्यात्

अत्रशिष्टानांचेतसस्तुष्टिर्धर्मप्रामाण्यमस्तुनेशकुंतला
श्रीहमानंदुष्यंतस्यमनोयथेतिमहाभारततात्पर्य्यविनि
र्णयोक्तदिशायदिशिष्टानांमनोप्यसन्मार्गेनाभिनि
विशतेतदापरमेश्वरस्यश्रीकृष्णस्यनिंद्यकर्मसंभावना
तुदूरापास्तैवेतिशास्त्रतत्त्वविदांराज्ञश्चसिद्धांतएवपरं
चतत्रत्यानामनवहितानांकेषांचिच्छंशयापनुत्तये आप्त
कामइत्यादिनाराज्ञःप्रश्नः अतएवतत्रतिवहुत्वकथन
मत्वदीयप्रश्नानुरोधेनैवोत्तरयतिश्रीबादरायणिःकर्मा
दिपारतंत्र्यरहितानांसमर्थानांधर्मव्यतिक्रमोयोदृष्टः
तथातेषांनिर्भयत्वंचयद्दृष्टंतत्तुतेजीयसांप्रत्यवायायन
भवतियथाऽग्नेःसर्वभुक्त्वंनोऽपायाविश्यायधर्मव्यतिक्र
मादिमयमीश्वराचरितमसमर्थोनिश्चयेनकदाचिदपि
एकांशेनापिमनसापिनाचरेत् आचरन्लोकदृयदुः
असमर्थः खित्वादिप्रकारेणनश्यति अनीश्वरोमौढ्यात्कालकूट
विषभक्षणोसद्योनश्यदेव नेश्वरः ईश्वरस्तुप्रत्युतऐश्वर्य्य
विशेषप्रकाशादिनाशोभतेयथानीलकण्ठत्वादिना ।

महादेवःबुद्धिमद्भिरीश्वराणामाज्ञाप्रमाणत्वेनग्राह्या
नतेषामाचरितंकुत्रचित्तदाज्ञानुसारेणतदाचरितमपि
ग्राह्यंकर्तृत्वाभावेनकर्मभिरलेपादतोनिरहंकारिणांनपु
ण्याचरणेनार्थःनचापापाचरितेनाऽनर्थःयदिनिरहं
कारत्वाभावेसतिपुण्यपापसम्पर्काभावादनर्थाभाव
स्तर्हिपरमेश्वरस्यसर्वेषांजीवानांनियन्तुःश्रीकृष्णस्य
कुतोऽनर्थशंकाऽपीत्यादिज्ञेयम्वसिष्ठस्यशतंपुत्रान्घा
तयामासकौशिकःनैनंबाधिरेब्रह्महत्यास्तास्तप
सोबलादितिमहाभारततात्पर्यविनिर्णयेप्रोक्तमद
स्त्रचअत्रापिकृष्णस्यनिंदाकृतेतिकस्यचिन्महापा
मरस्यैवोक्तिरितिज्ञेयम्

सुभद्राहरणकथायांकृष्णार्जुनसुभद्राणां
निंदैवकृताकृष्णःकपटरूपिणमर्जुनंमह
मायुक्तीतिकथितवानितिअर्जुनःकपटरूपं
कृतवानितिसुभद्रापिनिंदितंकर्मकृतवतीति

इयमेवकथात्वतिविस्तृतामहाभारतस्यादिपर्वण्यप्यस्ति
नत्वापिकृष्णादीनांनिंदात्रकृताऽतोमहाभारतंनव्यास
कृतमितित्वयोन्मत्तेनवाच्यम्तत्रकथायांतात्पर्यमिति
दंशेषमनज्ञानीनांवचःश्रेष्ठ्यंवरेश्रेयस्युपागतेश्रीकृ
ष्णोविजयंस्वस्वसारंमहारयदितिअर्जुनस्यमातुल
कन्यापरिणयनंतुआयाहीन्द्रपथिभिरीडितेभिर्यज्ञ

मिमंनोभागधेयंजुषस्वत्रंगंजहूर्मानुकेस्येवयोषाभाग
स्तेपेतृष्वसेयीवपामिवेतिमंत्रलिंगात् योषापत्यंमातु
लीयंयथाभागःपितृष्वसुःपुत्रस्येवंवपांमेशांजुषस्वेंद्रे
त्यृषिर्जगादिति

इंद्रस्यापिगोवर्द्धनोद्धरणाकथायांनिं
दाकृतांइंद्रोलज्जितोबभूवेति ॥

इयंगोवर्द्धनोद्धरणरूपाकथानुविष्णुपुराणेपाद्मोत्तरख
ण्डेगोपालतापिन्यांहरिवंशपुराणादावपिवर्णिता गोविं
दोगोविंदांपतिरित्यस्य व्याख्यायामाचार्यैः अहं किलें
द्रोदेवानांत्वंगवामिंद्रतांगतः गोविंद इति लोकास्त्वांस्तो
ष्यंति भुवि शाश्वतमित्युक्तम् अमेयात्मामहाद्रिधृगित्य
स्य व्याख्याने च महांतमद्रिं गोवर्द्धनं गोरक्षणेधृतवानि
ति महाद्रिधृक् इति तैरेवप्रतिपादितम् किंचशंकराचार्यै
र्गोविंदाष्टके गोपालंप्रभुलीलाविग्रहगोपालंकुलगो
पालंगोपीखेलनगोवर्द्धनधृतलीलालालितगोपालमि
त्यनेनगोवर्द्धनोद्धरणलीलावर्णितागोपीभिःसहविह
रणंतदर्थवनंप्राप्ते वृष्टिभयनिवारणाय गोवर्द्धनगिरेर्धृ
तिरकारि सैव लीला तस्मात्प्रयत्नसाध्यत्वात्तयालीलया
लालिताःपालिता गोपालायेनसतथोक्तस्तमितितट्टी
कायांचप्रतिपादितम् इत्थंचेंद्रस्यात्रनिंदाकृतेतिसर्वत्रै
वत्वयाबुद्धिमूल्येनवक्तव्यमिति

ऽष्टाशीतिसहस्राणामृषीणां महात्मनां
निंदैवकृता समाहोस्यानकथायाम् तेषांम
ध्ये एकोपिपरिक्षितिं समाधातुं समर्थोनेति

महाभारतादौ सर्वेष्वपिपुराणेषुसूतशौनक संवादो व
र्ततेतत्रापित्वयादृष्टेनकथ्यं शौनकादीनामृषीणाम
त्रनिंदैवकृतातेषांमध्ये एकोपितपुराणादीनां ज्ञाताय
तः सूतएवपुराणवक्तृत्वेन तैरुररीकृत इति वस्तुतः प्रकृ
ते श्रीशुकदेवस्य माहात्म्यवर्णनेतात्पर्यं नतु मुनीनां
निंदायामिति इत्थंचात्र मुनीनां निंदैवकृतेति कस्यचि
त्समतस्य प्रलपनमेवेति ज्ञेयम्

ब्रह्मणोऽपिवत्सहरणाहंसावतरणकथायां निंदै
वकृता ऽप्रज्ञानी ब्रह्मेति ततः पुष्करतः स्रष्टुस्सर्व
ज्ञोमूर्तिमान्प्रभुः ब्रह्मावेदमयस्साक्षात्प्रजापति
रनुत्तमइति महाभारतविरोधात्समतगीतमेतत् ।

ब्रह्मारूपवतीं पुत्रीं संध्याख्यां वीक्ष्य तोन्मदां ततः पुत्रीमु
पागूह्य समालिंग्य पुनः पुनः ततोतिव्रीडिता संध्यामृगी
जाता ततः परं रेमे विधिर्मृगो भूत्वा तं ददर्श ततो हरः ततः
पिनाकमाकृष्य विधिं हंतुं दुरोदरम् रभसेन शरं तस्मिन्मु
मोच सशरस्ततः प्रविवेश विधेर्देहं निर्गतश्च सदेहतः त
तस्तद्रभसेनैव निहतः सचतुर्मुख इति शिवरहस्ये स्कंद
पुराणादौ च वर्णितम् तत्रापिब्रह्मावेदमयः साक्षादिति

महाभारतविरोधात्प्रमत्तगीतमेतदितित्वयाबुद्धिमून्से
नवक्तव्यमितितन्नुतत्रमहादेवोदुर्ईशात्ब्रह्मादीनितिवं :
शिक्षयति किमुतान्यानितितात्पर्यं एवमत्रापिदेवादी
नामपिदर्पदलनंभगवताकृतमन्येषांकावार्तेतिज्ञेयम्
किंचत्रिपुरासुरवधेमहादेवरथस्यब्रह्मासारथिःसो
मसूर्यौरथचक्रे इत्यादिशिवपुराणादौवर्णितंतत्रापि
ब्रह्मादीनांनिर्देवात्रकृता ऽतः प्रमत्तगीतमेतदितित्व
याभराडेनवक्तव्यमिति

धर्मेचार्थेचकामेचमोक्षेचभरतर्षभयदिहा
स्तितदन्यत्रयन्नेहास्तिनकुत्रचित् महाभार
ताद्विरुद्धंयत्तत्त्व्यासप्रोक्तमितिमहाभार
ते इदंतुभागवतंमहाभारताद्विरुद्धमेवास्ति
तस्मात्प्रमत्तगीतमेव

श्रीमद्वाल्मीकिविरचितरघुनाथचरितेतद्रामवाणाभि
हतंपपातरक्षःशिरःपर्वतसन्निकाशम्बभंजचर्यागृह
गोपुराणिप्राकारमुच्चंतमपातयच्चेत्यादिनारामात्कुंभ
कर्णवधउक्तःमहाभारतेतुतंब्रह्मास्त्रेणासौमित्रिर्ददारा
द्रिवरोपमम्सपपातमहावीर्योदिव्यास्त्राभिहतोरणो
तंदृष्ट्वावृत्रसंकाशंकुंभकर्णंतरस्विनंगतासुंपतितंभू
मौराक्षसाःप्राद्रवन्भयादित्यादिनालक्ष्मणात्कुंभकर्ण
वधोवर्णितइतिइत्यंचवाल्मीकिनिर्मितरामायणम

दिभारतादिरुद्धमेवतस्मात्प्रमत्तगीतमेवेतित्वयानि
रयगामिनावक्तव्यम् एवंमार्कंडेयपुराणेपक्षिविहे
आराणामराडानुपरिघराणपतनस्साकथाकथिता
महाभारतेतुसानास्तितत्रापित्वयाधूर्तेनवक्तव्यंभा
रतविरुद्धंमार्कंडेयपुराणमतोनव्यासकृतंकिंतुप्रम
त्तगीतमेवेति एवंकाशीखण्डादिष्वपिज्ञेयमिति ।

वंदेमहापुरुषतेचरणारविंदम् द्यांमूर्द्धानंय
स्यविप्रावदंतिखंवैनाभिंसोमसूर्यौचनेत्रेदि
शः श्रोत्रेयस्यपादौक्षितिश्चध्यातव्योऽसौ
सर्वभूतांतरात्मा ॥१॥ यद्वाचानभ्युदितंयेनवा
गभ्युद्यतेतदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते
॥२॥ यन्मनसानमनुतेयेनाहुर्मनोमतम् तदे
वब्रह्मत्वंविद्धिनेदंयदिदमुपासतइत्यादिभ्यः
श्रुतिभ्योविरुद्धंचरणारविंदवंदनादिकमेवातो
ऽकथनीयमस्मद्वरीयन्त्रेदंप्रमत्तगीतंभागवतम्

एकोपिकृष्णस्यकृतःप्रणामोदशाश्वमेधावभृथेन
तुल्यः दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणामीनपुनर्भ
वायेतिमहाभारते नत्वाकृष्णपदंदेवमूर्च्छुर्गङ्गादयागिरे
तिगर्गसंहितायां नमस्करोतिमूर्धायंवाचास्तौतिनिरंत
रमितिवायुपुराणे यत्पादपंकजंगतामचलांचभक्तिंवां
छंतीतिपुराणादिषु ॐनमोविश्वरूपायविश्वस्थितं

नहेतवइत्यादितापनीयश्रुतिषु पाद्मे नपस्तत्स्नानरोघोर
मररोपनियतेंद्रियः यत्फलंसमवाप्नोतितंनत्वागरुडध्व
जमिति ब्रह्मवैवर्त्ते शरणागतरक्षणोद्यतंहरिमीशंप्रणा
मंतियेनराः नपतंतिभवांबुधौस्फुटंपतितानुद्धरतिस्मता
नसाविति नारसिंहेश्रीयमोक्तौतस्यवैनारसिंहस्यविष्णोर
मिततेजसः प्रणामंयेपिकुर्वंतितेषामपिनमोनमइतिवि
ष्णुपुराणे पादपद्मप्रणामतीत्यादिच पदनखनिविष्टमू
५ र्त्तिभिरितिमदंसूदनसरस्वती एवंवामनस्यविष्णोश्चर
णारविंदवंदनंपुराणादिषुप्रसिद्धं एवंगोविंदाष्टके शंक
राचार्य्यैरासक्रीडायांदेवगणोः श्रीकृष्णस्यचरणवंदनंकृ
तमितितट्टीकायांच वृंदावनभुविवृंदारकगणवृंदाराधितवं
देहंकुंदाभामलमंदस्मेरसुधानंदंसुहृदानंदंवंद्याशेषम
हामुनिमानसवंद्यानंदपदद्वंद्वंवंद्याशेषगुणाब्धिंप्रणम
तगोविंदंपरमानंदमितिवृंदावनभुविवृंदारकप्रदेशेरा
सक्रीडायांसंप्रवृत्तायांवंद्याश्चते ऽशेषामहामुनयश्चते
वंद्याशेषमहामुनयोनारदाद्यास्तेषांमानसेनहृदयेनवंद्य
ध्येयमानंदपदद्वंद्वंयस्यसतथोक्त इति एवंश्रीरामा
नंदसरस्वतीभिरपिसीतारामपदद्वंद्वमद्वंदानंदसाध
नम् नमामियद्रजोयोगात्पाषाणोपिसुरवंगतइतितद्व
र्णितं इत्थंच यदाचानभ्युदितमित्यादिश्रुतिविरुद्धं
चरणारविंदवंदनमित्यादिकं कस्यचिद्धिसिमस्य

कारागाराईस्यप्रलपनमिति ॥

पूर्वापरविरुद्धमप्यस्ति नृसिंहेन प्रह्लादाय
वरोदत्त एकविंशतिपित्राद्यास्तवमोक्षंग ।
च्छत्तु पुनरुक्तमप्रमत्तेनतावेवरावणकुंभ
कर्णौबभूवतुः पुनस्तावेवशिशुपालदन्तव ।
क्रौबभूवतुरितिच विरुद्धमेव ॥ ॥ ॥

अत्रहेनृसिंहमेपितानवतेजोऽविद्वान्भान्तहेतिमयाहष्टि
सन्त्वामनिंदत्तस्मात्सः पूयेतइमंवरंवृणोइतिप्रह्लादे
नोक्तं भगवनानुहेवत्सते पिता एकविंशतिपितृभिः सह
पूतः यतोयस्यकुले त्वं साधुर्जातः किंचहेप्रह्लादयत्रय
त्रमद्भक्तावसंतितेकीकटा अपिदेशाः शुद्धाभवंतीत्यु
क्तम् हिरण्यकशिपोर्मुक्तिस्तु भागवतेनोक्ता श्रीविष्णु
पुराणेच हिरण्यकशिपुत्वेचरावणत्वेच विष्णुनाहत्वा
पनिहतोभोगानप्राप्यानमरैरपि नालभत्तत्रचैवेहसा
युज्यंसकथंपुनः संप्राप्तः शिशुपालत्वे सायुज्यं शाम्भव
नेहरावित्येवोक्तम् इत्थंच पूर्वापरविरुद्धमप्यस्तीतिक
स्यचिद्देवानांप्रियस्यकथनमेवेति

भवान्कल्पविकल्पेषु नविमुह्यतिकर्हिचिदिति
ब्रह्मणेवरोदत्तोनारायणेनपुनरुक्तंब्रह्मामो
हितोभूत्वावत्सहरणांकृतवानितिविरुद्ध
मेवकथनम् ॥

ब्रह्मणः स्वकन्याभिगमनरूपो मोहः पूर्वकल्पे तत्रैवाऽभू
त् न तु चतुःश्लोकीभागवतोपदेशानन्तरमपि यत्तु कृष्णा
ऽवतारे ब्रह्मसंमोहनं तत्तु भगवत्कृपाविलसितमेवे
ति न विरुद्धकथनम्

कृष्णो नग्नां वाणासुरमातरं न दृष्टवान् पुनरुक्तं प्र
मनेन चीरलीलां कृतवानिति विरुद्धमेव ॥ ॥

श्रीरामचन्द्रस्ताडकां स्त्रीं जघान शूर्पणखां रावणभगि
नीं राक्षसीं स्त्रीं न जघान तत्रापि प्रमत्तकथनमेवेवा
च्यम् किंच हरिवंशपुराणे कृष्णस्यैकस्य नग्नरूपं दर्श
नार्थमागता ऽन्तर्धानमुपागम्य त्यक्तवाससी पु
नः प्रमुखे वासुदेवस्य दिग्वासा कोटवी स्थितेति विष्णुपु
राणे नग्ना दैतेयविद्याभूत्कोटवी पुरतो हरेरिति श्रीमद्भा
गवतोक्तकोटरा एव कोटवीति तत्र प्रसिद्धा एवं च तत्रा
पीयं कथा वर्त्तते अथवा तुष्यतु दुर्जन इति न्यायेन उप
नीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् वेदमध्यापये
देनं शौचाचारांश्च शिक्षयेदिति उपनीय शौचाचारांश्च
शिक्षयेदित्यनेन प्रागुपनयनात्कामचारो दर्शितः इति
मिताक्षरायामुक्तम् एवं चात्र न कश्चिद्विरोध इति ॥

भस्मासुरकथायां शिवस्य निन्दां कृत्वा पु
नर्विषपानकथायां भवानेव विष्ण्वादीना
मीश्वर इति विरुद्धमेव

भस्मासुरकथायां शिवस्य निंदा न कृतेति पूर्वमेवोक्तम् विद्
पानकथायां तु शिवस्य स्तुतिरेव कृतेति न विरोधः महाभार
तटीकायामुक्तम् नन्वत्रानर्थको युद्धादिप्रलापो भूयानुद्
ग्रपनेकशोकनीत्यादिश्चाधर्मप्रवर्त्तकोपि ग्रंथोस्ति तत
श्च कश्चिद्धर्मादिकथनेस्यपि विषसंपृक्तान्नवत्कृत्स्न
मप्येतद्धेयमेव एवं धर्मब्रह्मप्रतिपादनस्वतात्पर्य्यं अर्थ
वादज्ञानमपि युधिष्ठिरादिवद्वर्जितव्यं न दुर्योधनादिवदि
ति तत्रहीनं पक्षमुपाददानः स्वार्थाद्भ्रश्यतीति तेनाधीतम
पि भारतं पापायैव भवति तथा च सर्वस्माद्धि ग्रंथात्सा
रमेवादेयमित्यस्याऽप्यभिप्रायः एतेन ग्रंथमभ्यस्य मेधावी
ज्ञानविज्ञानतत्परः पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषत
इति एवमत्रापि श्रीमद्भागवते सारं सारमेवादेयमिति ॥

ऋते ज्ञानान्न मुक्तिरिति श्रुतेः नहि ज्ञानेन सदृ
शं पवित्रमिह विद्यत इति स्मृतेश्च एवं सति भ ।
क्तिरेव मोक्षकर्त्रीति वेदादिभ्यो विरुद्धमेव ॥

अत्र यावै साधनसंपत्तिः पुरुषार्थचतुष्टये तया विना न स
प्नोति नरो नारायणाश्रय इति महाभारते अनेन चतुर्वर्गफ
लं नारायणाश्रयणमात्रेण भवतीति सिद्धम् वाल्मीकिर
चितरामचरित्रे मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान्
गृध्रराज महासत्त्व संस्कृतश्च मया व्रजेति पाद्मे संस्कार
मकरोत्तस्य रामो ब्रह्मविधानतः स्वपदं च ददौ तस्मै सोपि

650

रामप्रसादतः हरेः समानरूपेण प्रययौ परमं पदमिति ॥ अ
नेन साधनहीनस्यापि तिरश्चः मुक्तिरुक्ता सहस्रनामभ
भाष्ये संसारसर्पसंदष्टनष्टचेष्टैकभेषजम् कृष्णेति
वैष्णवं मंत्रं श्रुत्वा मुक्तो भवेन्नर इति भारतविभागे कृ
ष्णः कृष्णः कृष्ण इत्यन्तकाले जल्पन् जंतुर्जीवितं यो ज
हाति ॥ प्राद्यः श्राद्धः कल्पनेतस्य हृजैवीडानमौनिष
नो ॥ न्याहृत्यास्याविति गीतायां देवान्देवयजो यान्ति म
द्भक्ता यान्ति मामपि मन्मना भव मद्भक्तो मद्याजी मां नमस्कु
रु मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ मां हि पा
र्थ व्यपाश्रित्य येपि स्युः पापयोनयः स्त्रियो वैश्यास्तथा
शूद्रास्तेपि यान्ति परां गतिमित्यादि ॥ अन्यसाधनानपेक्षत्वं
भक्तियोगस्य ज्ञानयोगादेश्च हरिपदसेवनसापेक्षत्वं ज्ञा
नयोगस्य भगवदाराधनं तत्प्रसादं च विनैव सिद्धिरिति न
क्वापि केनाप्युक्तम् किं च भक्तियोगे दुराचारिणोपि दृष्ट
वैराग्यरहितस्याप्यधिकारो गम्यते ॥ अपि चेत्सुदुराचा
रो भजते मामनन्यभाक् साधुरेव स मन्तव्यः सम्यग्व्यवसि
तो हि सः क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति न निर्विण्णो
नातिसक्तो भक्तियोगोस्य सिद्धिदः इत्यादिवचनेभ्यः
नैवं दुराचारिणोपि दृष्टवैराग्यादिसाधनचतुष्टयसंप
त्यभावेपि वेदान्तश्रवणाद्यनुष्ठितो ज्ञानोत्पत्तिर्भवति

निकाण्युपलभ्यते न च यथोक्ताधिकारसंपत्तिं विनानुष्ठि
तं साधनं किमपि फलाय कल्पते तस्मात्सर्वथा सर्वैःक
लौ हरिपादसेवनादि भक्तियोगाश्रयणमेव कर्त्तव्यमि
ति सिद्धमस्ति धर्मशास्त्रनिबन्धेषु गोविंदाष्टके शंकरा
चार्यैरुक्तम् गोविंदाष्टकमेतदधीते गोविंदार्पितचेता
यो गोविंदाच्युतमाधवविष्णो गोकुलनायक कृष्णेति
गोविंदांघ्रिसरोजध्यानसुधाजलधौतसमस्ताघो गोविं
दामलमंतस्थं स समभ्येति गोविंदं परमानंदमिति तट्टी
कायां चोक्तमानंदगिरिणा यस्तु निरंतरं गोविंदार्पित
चेताः सन्नेतद्गोविंदाष्टकमधीते गोविंदाच्युतमाधववि
ष्णो गोकुलनायक कृष्णेति एतानि नामानि कीर्त्तयति
गोविंदांघ्रिसरोजध्यानसुधाजलधौतसमस्ताघः प्रक्षा
लिताऽशेषपापो भूत्वा गोविंदं परमानन्दात्मानं मरणा
दिरहितमंतस्थं स समभ्येति सम्यक् निरुपद्रवस्थान
माप्नोति मद्भक्ता यान्ति मामिति भगवद्वचनादिति किंच पु
रुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया भक्त्या त्वनन्य
या शक्य अहमेवंविधोऽर्जुनेत्यादि भगवदुक्तेर्मोक्षसंप्र
ति साधकतमत्वश्रवणात्तदेकांतभक्तिरेव तत्र साक्षा
दात्मज्ञानावांतरव्यापारमात्रमुक्ता मोक्षहेतुरिति स्फु
टं प्रतीयते ज्ञानस्य च भक्त्यवांतरव्यापारत्वमेवमुक्तं ते
षां सततयुक्तानां भजतां प्रीतिपूर्वकम् ददामि बुद्धियोगं

र्यकेशवम् महाभारतटीकायांनीलकराठ चतुर्धरकृताया
म् यस्यैकैकनामव्याहारोऽपि सकृदपि येनकेन चिद्याहरोन
नाहरोन यस्यांकस्यांचिदवस्थायाम् यत्र कचिद्यदाकदा
चित् यथाकथंचित्कृते ऽस्मृतेंफलंददाति यथा च पु
राणे सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् बद्धः परिकर
स्तेन मोक्षाय गमनंप्रतिस्मादः पुल्कसकोवापि मुच्येरस्य
स्य कीर्त्तनात् ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रांत्यजा
दयः यत्रतत्रानुकुर्वन्तोविष्णोर्नामानुकीर्त्तनम् सर्वपापवि
निर्मुक्तास्तेपियांतिसनातनम् ऽअर्थं हि कृतनिर्देशोऽजन्म
कोटिचंहसामपि यद्वाजहार विवशोनामस्वस्त्ययनंह
रेः ऽअयंअजामिलस्तेनंसुरापोगुरुतल्पगः स्त्रीराजपि
तृगोहंतायेवापातकिनोऽपरे सर्वेषामप्यघवतामिदमे
वसुनिष्कृतम् नामव्याहरणं विष्णोर्यतस्तद्विषयामतिः
विष्णुधर्मे चक्रायुधस्य नामानि सदा सर्वत्र कीर्त्तयेत् ना
शौचं कीर्त्तने तस्य पवित्रं कुरुते यतः स्कांदे न देशकाला
वस्थात्मशुद्ध्यादिकमपेक्षते किंतु स्वतंत्रमेवैतन्नाम
कामितकामदम् नदेशनियमस्तस्मिन्नकालनियम
स्तथा नोच्छिष्टादौ निषेधश्च श्रीहरेर्नाम्नि लुब्धक वि
ष्णुधर्मोत्तरे नामानि सर्वाणि जनार्दनस्य कालश्च सर्वः
पुरुषप्रवीर तस्मात्सदा सर्वगं तस्य नाम ग्राह्यं यथेष्टं व
रदस्य राजन् ब्रह्मपुराणे ऽअनन्यचित्तः पुरुषोवाय सदा

कीर्तयेद्धरिम् सोपि दोषक्षयान्मुक्तिं लभेद्धरेरिति पतिर्यथा प
द्मपुराणे कृष्णेति वैष्णवं मंत्रं श्रुत्वा मुक्तो भवेन्नरः यत्र कु
त्रस्थितो वापि कृष्ण कृष्णेति कीर्तनात् सर्वपापविशुद्धा
त्मा स गच्छेत्परमां गतिं सर्वधर्मोज्झिता विष्णोर्नाममात्रै
कजल्पकाः सुखेन यां गतिं यान्ति न तां सर्वेपि धार्मिकाः
विष्णुपुराणे विष्णुसंस्मरणादेव समस्तक्लेशसंक्षयः भ
वंमयान्नाम पहारिणि स्थिते मनस्यनंते मयि कुत्र निर्वृति
यस्मिन्स्मृते जन्मजरोद्भवानि भयानि सर्वाणपघहंतितानि
न मात्स्ये परदाररतो वापि परापकृतिकारकः संशुद्धो मु
क्तिमाप्नोति कृष्णनामानुकीर्तनात् आदित्यपुराणे ह
रेः संकीर्तनं पुण्यं महापातकनाशनम् सर्वकामप्रदं लो
केऽप्यपवर्गफलप्रदमित्याद्युक्तम् अतः कलौ तपोयोग
विद्यायज्ञादिकाः क्रियाः सांगा भवंति न कलौ कुशलैरपि
देहिभिरित्यादीनि वचनान्यनेकानि तत्र तत्र निपादकानि सं
त्येव किं बहुलेखनेनेति इत्थं च भक्तिरेव मोक्षकर्त्रीति वेदा
दिभ्यो विरुद्धमेवेति कस्यचिच्छंका ऽनभिज्ञस्यैव कथनमिति

अतः कुत्रयस्य भागवताख्यस्य कर्णामृतस्वा
स्मात्कारणात्सुखेप्सुभिः कदाचिदिदं प्रमत्तगी
तं भागवतं न कथनीयं न श्रोतव्यं चेति सिद्धांतः
येतु लोभाच्छ्रावयंति मूर्खवत्साच्छृणवंति ते वै
नरके पतिष्यंति ये प्रमत्तगीतमिदं भागवतं

श्रावयति श्रवणं वतिच ते सर्वे पापकारिणः अत
एव महापातकिनस्संति यश्च कथितवान् वोपदे
शार्थस्सोपि पापकारी महापातकी चास्ति अत
एव प्रमत्तगीतस्यास्य भागवतस्याध्ययनमध्या
पनं कथनं श्रवणं च नरकगामकमेव किं बहुना
लेखनेनैतावतैव वेदितव्यं युष्माभिरेवमेव जन्मा
द्यस्य यतोन्वयादितरतश्चेत्यादिश्लोकैर्निर्मि
तमिदं भागवतं सर्वमशुद्धमिति ॥ ॥ ॥

योऽनभिज्ञाय मुनिभिः कृतं शास्त्रं दूषयति स ब्रह्मघाती तदु
क्तं महाभारते यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा मुनिभिः कृतम्
दूषयत्यनभिज्ञाय तं विद्याद्ब्रह्मघातिनमिति श्रीमद्भागवतं
महापुराणं सर्ववेदेतिहासानां सारमनादिसिद्धमपि वोप
देवरचितत्वादाधुनिकमिति दुष्टाः प्रमत्ता वदंति किमत्र
चित्रं नास्तिकाश्चार्वाकादयः परमेश्वरमपि नोररीकुर्वंति
अनादिसिद्धं वेदमपि व्याघातपुनरुक्तत्वादिदोषग्रस्तं भ
ण्डधूर्त्तादिभिर्विरचितमाधुनिकमिति वदंत्येव तदुक्तं ना
स्तिकैः यावज्जीवं सुखं जीवेदृणं कृत्वा घृतं पिबेत् भस्मी।
भूतस्य देहस्य पुनरागमनं कुतः अग्निहोत्रं त्रयो वेदास्त्रि
दण्डं भस्मगुण्ठनम् बुद्धिपौरुषहीनानां जीविकेति बृह
स्पतिः यदि गच्छेत्परं लोकं देहादेव विनिर्गतः कस्माद्भूयो
न चायाति बंधुस्नेहसमाकुलः ततश्च जीवनोपायो ब्राह्म

रोर्विहितस्त्विह मतानां प्रेमदा योगिनूत्वन्यद्दियनेकश्चित् त्र
योवेदस्यकर्त्ता सोभंडधूर्त्तनिशाचराः अर्फरीतुर्फरीत्यादि पण्डिता
नां वचः स्मृतमिति इत्थं च अतः कुग्रंथस्येत्यादिकस्य चित्रात्ति
कस्य संभाषणानर्हस्य जन्मांधस्य पतितस्य संन्यासाभासस्य
कथनमेव ज्ञेयम् पाखंडान्यवलंब्य भरद्रमतयः प्रौढाभिमाना
धायः स्वल्पतावद्दुःखिनः स्फुटतरं कालस्य भस्याश्रये देवं
तेऽधनेसुखात्म लिहौना म्नाभवाश्चेतरो कांक्षा कल्पतरोज
गत्त्रयगुरोर्विम्बं भरोजस्य पि ॥१॥ गोविंदसेवनमिदं यदिनाद्रि
यंते दुष्टानिकृष्टमनयो विषयैकनिष्ठाः किं नाव ताज्वरवता
मरुद्वेर्न जातु दुग्धस्य सुष्ठु मधुरस्य निरूपणं स्यात् ॥२॥

कथं तर्हि श्रीधरादिभिरस्य टीका कृता
अज्ञानत्वात् कृतस्तदज्ञानत्वं न तु श्रीधरादिषु
न ज्ञानमस्तु द्वैतेरतोऽज्ञानत्वमेव ॥ ॥ ॥

श्रीमद्भागवतस्य हनुमद्भाष्यसंबंधोक्तिविद्वत्कामधेनुत
त्वदीपिका विवरणा परमहंसप्रिया शुकहृदयादयस्तथा शं
कराचार्य नीलकंठ सदानंद भिक्षु पण्डित गोविंदादिभि
श्च कृता व्याख्याग्रंथास्संति तथा भागवद्भक्तिरसायनमुक्ता
फल हरिलीला भक्तिरत्नावल्यादयो निबंधाश्च विविधा विद्यं
ते किंच वैष्णवव्यतिरिक्ताः प्रामाणिका अपि स्वस्वग्रंथेषु
श्रीमद्भागवतस्य संमतिं ददुः कास्ति संमतिरिति चेद्बधे
हि संवत्सरप्रदीपे हेमाद्रौ सच्चरितमीमांसाख्ये विचारो

शेनिर्णयसिंधौआचारमयूखेव्यवहारमयूखेधर्मसिंधौदिन
करोद्योतादौच एवं महाभारतटीकायांनीलकंठचतुर्धरकृ
तायांनागोजिभट्टविरचितायांसप्तशतीव्याख्यायांशिव
तत्वविवेकेकालनिर्णयदीपिकाविवरणेवीरमित्रोदयेग
रुडपुराणटीकायांवाल्मीकिरामायणटीकायांमहिम्नः
स्तवराजस्यटीकायांभट्टोजिदीक्षितकृतायांचतुर्विंशति
मतव्याख्यायांकाशीखंडटीकायांयोगवासिष्ठटीकायां
तथान्यास्वपिटीकासुतथाविद्भुभक्तानांसर्वेष्वपिग्रंथे
ष्वितिइत्थंचैतेविद्वत्तमाःसर्वेऽपितवप्रमत्तस्यमतेमूर्खा
एवेति ॥

सत्यंपरंधीमहीत्यत्रशिष्याभिप्रायंबहुवचनमि
त्युक्तवान्प्रमत्तःश्रीधरइतिशिष्यास्तुगुर्वादि
वर्तनेकुतोऽभिप्रायस्तत्रायातः एकोपिब्रूयादेव
महंब्रवीमिवयंब्रूमोवाऽस्मदोद्वयोश्चेतिव्याकर
णसद्भावतोऽस्मदमेनच्छिष्याभिप्रायंबहुवचन
मिति ॥

अत्रअस्मदोद्वयोश्चेत्यनुशासनाद्यद्यप्येकत्वेद्वित्वेचवि
वक्षितेऽस्मदोबहुवचनंविकल्पेनभवतितथापिप्रथमोप
स्थितत्वादेकवचनंपरित्यज्यबहुवचनपर्यंतानुधावनंकि
मितिग्रंथकृताऽस्माकंतुशिष्याभिप्रायंबहुवचनमिति
स्वामिपादैस्सम्यगेवोक्तम् एवंध्यायंध्यायंपरंब्रह्मस्मारं
स्मारंगुरोर्गिरःसिद्धांतकौमुदीव्याख्यांकुर्मःप्रौढमनोर
मामित्यादावपिज्ञेयम् इत्यंचप्रमत्तःश्रीधरइत्यादिकथनं
तुकस्यचिज्जंतोःस्ववाचाटस्यैवेति॥

अन्यकृतमिति निःशंकनीयमित्युक्तं च श्रीधरेण
आक्षेपोऽसत्यां निषेधः अतोऽन्यकृतमेव ॥ ० ॥

अत्रैनिर्मूबाधकप्रमाणस्यानवसेसुन्नादर्शिमिस्यजागरू
कत्वेनैनिद्रानुरस्यनुपनेरिमिश्रयवामीमांसकवैशेषिकगो
तमादिभिर्वेदस्यप्रामाण्यंसाधितमिति आग्वेदप्रामाण्य
शंकास्त्रि नेतिनस्वीक्रियते अथापिस्वीकार्य्य अथास्ति
कादीनांवेदप्रामाण्यशंकाभावेऽपिनास्तिकानांसास्थितेति
समः समाधिः यथामन्वादिधर्मशास्त्रेऽपिचौर्य्यहिंसादिनि
षेधात्प्राकृतदनुष्ठानंस्थितमितिनस्वीक्रियतेनथाप्रकृते
अथवा विधिनाचौर्य्याद्यनुष्ठानाऽभावेपिरागप्राप्तंतदासी
दितिनर्हिनापिहेयत्वदाशंकनंस्थितमितिसमाधानम्
इत्थं च अन्यकृतमित्यादिकंकस्यचिद्वाचालस्यैवकथनमि
तिज्ञेयम् ॥

नायंश्रीधरनामाकस्तर्हिदरिद्राधरनामेवास्तिकु
तोमूर्खत्वात् किंबहुनालेखनेनश्रीधरादीनां
ज्ञानमेवनास्तिवेदादिष्विति स्थालीपोलाकन्या
यवल्लेखनंकृतमस्माभिस्तद्बुधाभिर्वेदितव्यं
सर्वभागवतमप्युदमिति

माधवसरस्वतीसमयेकेनचित्पण्डितेनभागवतमप्रमाण
मित्युक्तम् तदास्वामिभिरुक्तमयंजारजोभविष्यतीतिविचार
णीयम् तदापण्डितैर्विचारितेसगोलकइतिनिश्चितमिति
रामाश्रमाचार्य्यैरपदुर्जनमुखचपेटिकायामुक्तमितिइत्थं
वनायमित्यादिकंकस्यचिज्जारजातस्योष्ट्रस्यधार्त्तराष्ट्र
स्यैवकथनमितिज्ञेयम् येषांपरिलेखः कश्चिद्यःपतिःस्यात्तेषां

 

कुतः क्लेशपरिक्षयः स्यात् कुतश्च सुखं नहमार्श्रितानां विहं
गमानामिह सौख्यलाभः ॥१॥ गोविंदएवसुखसिंधुरितिश्रु
तीनां संशीलनादवगतं शतसोमहद्भिः किंचास्य चिंतनकृ
तां ननु रंचितैव रोमांचितैर्भवति हर्षजलं च नेत्रे ॥२॥ दुर्जनो दूष
यत्येव सतां गुणगणं क्षणात् मलिनीकुरुते धूमः सर्वथा विम
लांवरम् ॥३॥ गुणी गुणं वेत्ति न वेत्ति निर्गुणो बली बलं वेत्ति न
वेत्ति निर्बलः पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य
बलं न मूषिकः ॥४॥ गुणा गुणज्ञेषु गुणा भवंति ते निर्गुणं प्रा
प्य भवंति दोषाः सुस्वादु तोयाः प्रभवंति नद्यः समुद्रमासाद्य भ
वंत्यपेयाः ॥५॥ गुणायंते दोषाः सुजनवदने दुर्जनमुखे गुणा
दोषायंते किमिति जगतां विस्मयपदम् यथा जीमूतोयं लवणा
जलधेर्वारि मधुरं फणी पीत्वा क्षीरं वमति गरलं दुःसहतरम्
॥६॥ अनिरमणीये ग्रंथेऽपि पिशुनो दूषणमन्वेषयति अनि
रमणीये वपुषि व्रणमिव मक्षिकानिकरः ॥७॥ ०॥ ०॥ ०॥

ब्राह्मणक्षत्रियविट्शूद्रा वर्णाः ब्रह्मचारिगृहिवनि
संन्यासिन आश्रमाश्च ज्ञातव्याः एषां वेदेषु मनुस्मृतौ
च धर्मा उक्ताः एभ्यो ये विरोधिनस्ते पाषण्डिनः एवं कि
लक्षणास्ते च काषायकौपीनकेवलोर्ध्वपुण्ड्रकाष्ठमाला
धारिणः न मसुद्रोर्ध्वपुण्ड्रे हेनरकावाससाधने तस्मा
त्त्याज्यमनघेर्द्विजैर्नरकभीरुभिरिति ज्ञानमालिः १
विभूतिधारणात्यक्त्वा रुद्राक्षधारणम् मामा
पूजयविम्बेषु शिवलिंगस्वरूपिणमित्याह विष्णुपु
राणे यज्ञोवैविष्णुरितिश्रुतेर्यज्ञकर्त्तावैष्णवो ना
न्यः वृहन्नारदीयपुराणे धर्मभगीरथसंवादे भ
गीरथं प्रति धर्मराजवाक्यम् यत्न संतप्तशंखादि

लिंगांकिततनुर्नरः ससर्व्वयातनाभागीचाण्डालःको
टिजन्मसु एतल्लक्षणाः पाषण्डिनः येतुपाषण्डिम
तविश्वासिनस्तेपिपाषण्डिनः पाषण्डिनोविकर्म्म
स्थान्वैडालव्रतिकान्शठान्हैतुकान्वकवृत्तींश्च
वाङ्मात्रेणापिनार्च्चयेदित्याहमनुः अतएववाङ्मा
त्रेणापिपाषण्डिभिस्सहव्यवहारोनकर्त्तव्यः॥ ॥
वर्णाश्रमधर्म्मावेदेषुमनुस्मृतौचोक्ताः एभ्योविरोधिनस्तेपा
षण्डिनएवनेच अनग्निरनिकेतःस्याद्ग्राममन्नार्थमाश्रयेत्
उपेक्षकोऽसंकुसुको मुनिर्भावसमाहितः इत्यादिमनुस्मृत्युक्त
संन्यासिधर्म्मविरुद्धाचारिणोदण्डादिलिंगमात्रधारिणःसं
न्यासिनएव नतुचक्राद्यंकनोर्द्ध्वपुण्ड्रादिधारिणोवैष्णवाःन
चमनुस्मृतौचक्राद्यंकनादेर्निषेधोदृष्टचरः शास्त्रेषुचबहुधा
चक्राद्यंकनादेर्माहात्म्यप्रतिपादनात् तदुक्तंवाराहे अंकयेत्तप्त
चक्राद्यैरात्मनोबाहुमूलयोः कलत्रापत्यभृत्येषुपशुक्षेत्रसर्व
संपदमिति सोपरोऽप्यशुचिर्वाप्यनाचारःसर्वधर्म्मबहिष्कृतः
अतप्तशंखचक्राभ्यामंकितःपंक्तिपावनइति पाद्मेशंखच
क्रोर्द्ध्वपुण्ड्रादिरहितंपुरुषाधमंगर्दभंतुसमारुह्यराजाराष्ट्रा
त्प्रवासयेदिति स्कान्देनारायणायुधैर्नित्यंचिह्नितोयस्यविग्र
हः पापकोटियुतस्यापितस्यकिंकुरुतेयमः अंकितःशंख
चक्राभ्यामुभयोर्बाहुमूलयोःसमर्चयेद्धरिंनित्यंनान्यथापू
जनंभवेदिति सनत्कुमारसंहितायां चक्रंचदक्षिणेबाहावि
त्यादि काशीखंडे उपवीतादिवद्धार्य्याःशंखचक्रादयःसदा
ब्राह्मणस्यविशेषेणवैष्णवस्यविशेषतः इति वाराहे चक्रा
दिधारणंपुंसांपरसंबंधवेदनम् पातिव्रत्यनिमित्तंहिवल
यादिविभूषणमिति वायुपुराणे अग्निनैवतुसंतप्तचक्र

मारायवैष्णवः धारयेत्सर्ववर्णानांहरिसालोक्यसिद्धयइति
ब्रह्मांडे कृत्वाधातुमयीं मुद्रांतापयित्वात्वकांननु चक्रादिचि
९ ह्नितांभूप धारयेद्वैष्णवोनरइतिश्रुतयश्चयोहवैसुश्लोककामो
लेर्धीमाननुतिष्ठमानोग्निनाचक्रंधत्तेऽग्निर्वैसहस्रारः
सहस्रारिनेमिनाततमनुःसायुज्यंसलोकतामाप्नोतिचक्रं
बिभर्तिवपुषाभितप्तंबलंदेवानाममृतस्यविष्णोःसएतिना
कंदुरितंविधूयविशंतियद्यतयोवीतरागाइत्याद्याबह्वृचाःपाद्मे
नरखंडे शंखचक्रादिभिश्चिह्नैर्विप्रःप्रियतमोहरेः रहितस्सर्व
धर्मेभ्यःप्रच्युतोनरकंव्रजेदित्याद्यनेकवचनानिहरिभक्ति
स विलासँसदाचारचंद्रिकारामार्चनचंद्रिकामथुरासेतुजय
सिंहकल्पद्रुमादिग्रंथेषुसंत्येवकिंबहुलेखनेनेति १ अ
थोर्ध्वपुंड्रमाहात्म्यम् पराशरमाधवीयेस्मृत्यंतरः ऊर्ध्वपुंड्रोमृ
दाशुभ्रोललाटेयस्यदृश्यतेसचांडालोपिशुद्धात्मापूज्यएव
नसंशयइतिमदनरत्नेमदनपारिजातेप्रयोगपारिजातेषु
ब्राह्मेयोगोदानंजपोहोमःस्वाध्यायःपितृतर्पणम् भस्मीभ
वतितत्सर्वमूर्ध्वपुंड्रंविनाकृतमितिकृष्णभट्टीयाह्निकेतु
जपोहोमस्तपोदानंस्वाध्यायइतिपूर्ववत् निर्णयसिंधौहेमा
द्रौदेवलःललाटेपुंड्रकंदृष्ट्वास्कंधेमालांतथैवचनिराशाःपि
तरोयांतिदृष्ट्वाचवृषलीपतिम् पुंड्रंवर्तुलमित्यपरार्केमदनरत्ने
चपुंड्रंत्रिपुंड्रंवर्तुलमर्धचंद्रंचऊर्ध्वंचतिलकंकुर्यान्नकुर्याद्दै
त्रिपुंड्रकम् ऊर्ध्वंचतिलकंकुर्याद्दैवेपित्र्येचकर्मणि निरा
शाःपितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकमितिवृद्धपराशरोक्तेःति
र्यग्लेपोभवस्यैववर्जयेत्तिलकंभालेश्राद्धकालेचसर्वदा ।
तिर्यगूर्ध्वंत्रिपुंड्रंवाधारयेत्तुप्रयत्नतइतिव्यासोक्तेरितिपृथ्वी

चंद्र इति पाद्मोत्तरखंडे श्रीशिवपार्वतीसंवादे ऊर्ध्वपुंड्रधरो
विप्रः सर्वलोकेषु पूजितः विमानवरमारुह्य याति विष्णोः परं
पदं ऊर्द्ध्वपुंड्रधरं विप्रं दृष्ट्वा पापैः प्रमुच्यते नमस्कृत्वा तथाभ
क्त्या सर्वदानफलं लभेदित्यादि ब्रह्मांडपुराणे ऽप्यशुचिर्वा
प्यनाचारो मनसा पापमाचरन् शुचिरेव भवेन्नित्यमूर्द्ध्वपुं
ड्रांकितो नर इत्याद्यनेकवचनान्यूर्द्ध्वपुंड्रमाहात्म्यप्रतिपाद
कानि संत्येव किंच महाभारतटीकायामुक्तम् वासुदेवोपनि
षद्व्याख्यानेऽपि पुराणोपबृंहणानुसारात् श्रोणामेकउदकं
गामश्वाजतीनिश्चन्द्रः भवनां मध्ये एकः श्रोणां श्लक्ष्णांगां
मृदं गोपीचंदनादिरूपां मुख्यकर्मभूतां प्रति उदकं जलं गौणे
न कर्मणा प्रवाजति प्रवगमयति अंतर्भावितण्यर्थोयम् श्रो
णांगां उदकेन मिश्रयतीत्यर्थः ऊर्द्ध्वपुंड्रार्थं श्लक्ष्णां मृदं जले
न मिश्रयेत् विष्णुभक्तानां गमूर्द्ध्वपुंड्रमित्यादि विस्तरेणोक्त
मतत्रैवावलोकनीयमिति किं बहुना अथ तुलसीकाष्ठ
मालाधारणमाहात्म्यम् अगस्त्यसंहितायां रामार्चनचंद्रिका
यां च तुलसीकाष्ठघटितैरुद्राक्षाकारकारितैः शंखचक्रगदा
पद्मपादुकाकारकारितैः निर्मितां मालिकां कंठे निधायार्च
नमारभेदिति नृसिंहाराधनरत्नमालायाम् तुलसीकाष्ठघटितै
र्मणिभिर्जपमालिका सर्वकर्माणि सर्वेषामीप्सितार्थफल
प्रदेति नृसिंहपरिचर्यायां अथ विष्णुसमर्पितां तुलसी ।
काष्ठमालां धात्रीफलमालां पद्माक्षमालां वा करोति विष्ण
यादिति गौतमीयतंत्रे च चंद्रोदये सदा प्रीतमनास्तस्य कृष्णो दे
वकीनंदनः तुलसीकाष्ठसंभूतां यो मालां वहते नरः प्राय
श्चित्तं न तस्यास्ति नाशौचं तस्य विद्यत इति मथुरासेतौ अत्र ।

रासमुच्चयेयः कुर्य्यात्तुलसीकाष्ठैरक्षमालां सुरूपिणीम्
कंठमालां प्रयत्नेन कृतं तस्याक्षयं भवेदिति निर्णयसिंधौ
स्कांदे द्वारकामाहात्म्ये निवेद्य केशवे मालां तुलसीकाष्ठसं
भवाम् वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् न तु धात्रीतुल
सीमालां धात्रीमालां विशेषतः महापातकसंहर्त्रीं धर्मकामा
र्थदायिनीम् विष्णुधर्मे स्कंदे तु यानि लोमानि धात्रीमालाक
लेवराणाम् तावद्वर्षसहस्राणि वैकुंठे वसतिर्भवेत् माला
युग्मं तु यो नित्यं धात्रीतुलसिसंभवम् वहते कंठदेशे तु क
ल्पकोटि दिवं वसेत् तुलसीकाष्ठसंभूते माले कृष्णजनप्रिये
बिभर्मि त्वामहं कंठे कुरु मां कृष्णवल्लभम् एवं संप्रार्थ्य
विधिवन्मालां कृष्णगलेऽर्पिताम् धारयेत्कार्तिके यो वै स ग
च्छेद्वैष्णवं पदमिति यत्तु तत्रैव मालाधारणप्रकरणे सर्वपु
स्तकेषु दृश्यमानमप्यत्र मूलं चिंत्यमिति कश्चिन्निर्णयसिंधु
पुस्तके दृश्यते तस्य मालाधारणविधिवाक्यानां नाप्रामाणि
कत्वेनासंपर्य्य स्वयमेव स्कंदपुराणस्थत्वेन विष्णुधर्मस्थत्वेनो
क्तानां स्वयमेवाप्रामाणिकत्वोक्तौ व्याघातप्रसंगात् तुलसी
काष्ठघटितैरुद्राक्षाकारकारितैः निर्मितां मालिकां कंठे निधा
यार्चनमारभेत् तुलसीकाष्ठमालाया भूषितः कर्म्माचरन् पि
तृणां देवतानां च कृतं कोटिगुणं भवेदिति पद्मपुराणे पाता
लखंडेऽष्टसप्ततितमाध्याये प्रत्यक्षोपलभ्यमानविरोधाच्चत
स्यच्च माधवादिमूलग्रंथेष्वनुपलभ्यत इत्येवं तत्परिभाषाणा
सर्व्यं नत्व प्रामाणिकत्वे एतदनुपन्यासेपि माधवादीनां न
न्यूनत्वे निर्णयमार्त्तंडचंद्रिकादौ तुलसीकाष्ठमालया जपविधि

निस्पष्टानिएवंग्रंथांतरेषुबहूनिवाक्यान्युपलभ्यंतेसर्वदे
शीयवैष्णवेषुतुलसीकाष्टमालाधारणजपाचारश्चोपल
भ्यतइतिधर्मसिंधावुक्तम् काशीखंडेब्राह्मणाःक्षत्रियो
वैश्यःशूद्रोवायदिवेतरः शंखचक्रांकिततनुस्तुलसीमंज
रीधरःगोपीचंदनलिप्तांगोदृष्टश्चेत्तदघंकुतइतिकिंबहूले
खनेनेतिपद्मपुराणेकपालभस्मास्थिधारायेह्यवैदिकलिं
गिनःअवैदिकक्रियोपेतास्तेवैपाषंडिनःस्मृताःशंख
चक्रोर्ध्वपुंड्रादिचिह्नैःप्रियतमैर्हरेः रहितायेद्विजादेविते वै
पाषंडिनःस्मृताःसमस्तयज्ञभोक्तारंविष्णुंब्रह्मणापदैवत
म् उद्दिश्यपदेवताएवजुहोतिचददातियःसपाषंडीतिविज्ञेयः
स्वतंत्रोवापिकर्मस्वात्मन्याक्रियतेयैस्तुकर्मभेदोदितंम(
ह्मन्यस्तुनारायणंदेवंब्रह्मरुद्रादिदैवतैःसमत्वेनैववीक्षेत
सपाषंडीभवेत्सदाअवस्थात्रितयेयस्तुमनोवाक्कायक
र्मभिःवासुदेवंनजानातिसपाषंडीभवेद्द्विजःकिमत्रब
हुनोक्तेनब्राह्मणायेह्यवैष्णवाःइतिजीविकार्थदंडधारण
पदार्थखंडनादिनानरककामित्वम् तदुक्तंमनुस्मृतौधर्मध्व
जीसदालुब्धश्छाद्मिकोलोकदंभकःवैडालव्रतिकोज्ञेयो
हिंस्रःसर्वाभिसंधकःअधोदृष्टिर्नैष्कृतिकःस्वार्थसाध
नतत्परःशठोमिथ्याविनीतश्चबकव्रतचरोद्विजःयेबक
व्रतिनोविप्रायेचमार्जारलिंगिनःतेपतंत्यंधतामिस्रेते
नपापेनकर्मणाइतिश्रद्धाविहीनास्तु केचिद्विषयभोगप
राःकेचित्पांडित्यादिगर्वेणाभगवद्भक्तिनिंदापराःसंतोनि
रयेपिनिंदनीयाएवभवंतीत्युक्तंमधुसूदनसरस्वतीचर
णैः ब्राह्मणक्षत्रियविट्शूद्रावर्णाइत्यादिकंतुकस्यचि
त्पाषंडिनोजीविकार्थंकाषायांबरधारिणःशठस्यवै

डालव्रतिकस्यवकव्रतचरस्यमहानिंदकस्यनिरयगामिनो
दर्शनभाषणाद्यनर्हस्यवान्ताशिनः पतितस्यकथनम् पति
तसंसर्गेणापिपतति अतस्तेनसर्वथासंभाषणादिसंस(
र्गःकदापिनविधेयः एवंत्रिदण्डधारणमपिमनुस्मृतौतट्टी
कायांचकुल्लूकभट्टेनकथितमेव किंवहुलेखनेन नत्रै
वाऽवलोकनीयमिति ॥

पाषाणादिमूर्तिपूजनं पाषरिडमतमेवकुतए
तत्वेदादिभ्योविरोधात्यद्वाचानभ्युदितंयेनवाग
भ्युद्यतेतदेवब्रह्म त्वं विद्धिनेदंयदिदमुपासतेयन्म
नसानमनुतेयेनाहुर्मनोमतम्तदेव० २ यत्प्राणे
ननप्राणितियेनप्राणःप्रणीयतेतदेव० ३ इत्यादि
श्रुतिभ्यःअतएवपाषाणादिकत्रिममूर्तिपूज
नंवृथैवअव्यक्तंव्यक्तिमापन्नंमन्यन्तेमामवुद्धयः
इतिभगवद्गीतावचनात् किंवहुनालेखनेनैवतै
कसज्जनैर्वेदितव्यम् विदित्वाचरणीयमेवदयानं
दसरस्वत्याख्येनस्वामिनानिर्मितमिदंपत्रंवेदि
तव्यंविद्वद्भिरितिशुभंभवतु वकुभ्यःश्रोतृभ्यश्च
वेदोपवेदवेदांगमनुस्मृतिमहाभारतहरिवंशपु
राणानांवाल्मीकिनिर्मितस्यरामायणस्यचा
ध्यापनमध्ययनंकर्त्तव्यंकारयितव्यंचएतेषा
मेवश्रवणंकर्त्तव्यमिति

भक्त्यात्वनन्ययाशक्यअहमेवंविधोऽर्जुन ज्ञातुंद्रष्टुंचतत्वे
नप्रवेष्टुंचपरंतप मत्कर्मकृन्मत्परमोमद्भक्तःसंगवर्जि
नः निर्वैरःसर्वभूतेषुयःसमामेति पांडवक्लेशोऽधिकत
रस्तेषामव्यक्तासक्तचेतसां अव्यक्ताहिगतिर्दुःखंदेहव